परितव्यम्-परीतव्यम्, पारयितव्यम्, पुपूर्षितव्यम्-पिपरिषितव्यम्-पिपरीषितव्यम्, पोपुरितव्यम्;

परणीयम्, पारणीयम्, पुपूर्षणीयम्, पिपरिषणीयम्-पिपरीषणीयम्, पोपुरणीयम्;

पार्यम्, पार्यम्, पुपूर्ष्यम्-पिपरिष्यम्-पिपरीष्यम्, पोपूर्यम्;

ईषत्परः-दुष्परः-सुपरः;

[1]पूर्यमाणः, पार्यमाणः, पुपूर्ष्यमाणः-पिपरिष्यमाणः-पिपरीष्यमाणः, पोपूर्यमाणः;

परः, पारः, पुपूर्षः-पिपरिषः-पिपरीषः, पोपुरः;

परितुम्-परीतुम्, पारयितुम्, पुपूर्षितुम्-पिपरिषितुम्-पिपरीषितुम्, पोपुरितुम्;

पूर्तिः-[2]पूर्णिः, पारणा, पुपूर्षा-पिपरिषा-पिपरीषा, पोपुरा;

परणम्, पारणम्, पुपूर्षणम्-पिपरिषणम्-पिपरीषणम्, पोपुरणम्;

पूर्त्वा, पारयित्वा, पुपूर्षित्वा-पिपरिषित्वा-पिपरीषित्वा, पोपुरित्वा;

प्रपूर्य, प्रपार्य, प्रपुपूर्ष्य-प्रपिपरिष्य प्रपिपरीष्य, प्रपोपूर्य;

पारम् २, } पारम् २, } पुपूर्षम् २-पिपरिषम् २-पिपरीषम् २, }
पूर्त्वा २, } पारयित्वा २, } पुपूर्षित्वा २-पिपरिषित्वा २-पिपरीषित्वा २, }
पोपुरम् २; }
पोपुरित्वा २; }

[3] पुरुः, [4]पर्व, [5]पुरीषम्, [6]पुरुषः, [7]परुषः, [8]परुः।

---

1. यकः कित्त्वेन उत्वरपरत्वादिकं ज्ञेयम्।
2. 'ऋल्वादिभ्यः क्तिन् निष्ठावद् वाच्यः' (वा. 8-2-44) इति नकारे, णत्वम्। एतच्च पाक्षिकमिति केचित्।
3. 'पॄभि—' (द. उ. 1-108) इति कुप्रत्ययः। पृणाति, पूर्यते वा इति पुरुः= विस्तीर्णः, लोकश्च।
4. 'स्नामदिपद्यर्तिपॄ—' (द. उ. 6-68) इति वनिप्प्रत्ययः। पृणाति, पिपर्ति पूर्यते वा इति पर्व=अङ्गुल्यग्रम्, पुण्यतिथिश्च।
5. 'शॄपॄभ्यां कित्' (द. उ. 9-10) इतीषन्प्रत्ययः, तस्य कित्त्वं च। पृणाति, पूर्यते वा तेनोदरमिति पुरीषम्।
6. 'पुरः कुषन्' (द. उ. 9-14) इत्यनेन कुषन्प्रत्यये, उत्वादिकम्।
7. 'पॄकलिभ्यामुषच्' (द. उ. 9-15) इत्युषच्प्रत्ययः। पृणाति, पिपर्ति इति वा परुषः=अमृदुः।
8. 'अर्तिपॄवपि —' (द. उ. 9-39) इत्युसिप्रत्ययः। परुः= समुद्रः, राजा च।